# Shri Shiva Sahasranamavali from Shivarahasya Adhyaya 24 1000 Names

# श्रीशिवसहस्रनामावलिः शिवरहस्यान्तर्गतम् अध्याय २४

## Document Information


Text title : Shiva Sahasranamavali from Shivarahasya Amsha 12 adhyAya 24

File name : shivasahasranAmAvaliHshivarahasya24.itx

Category : shiva, sahasranAmAvalI, nAmAvalI, shivarahasya

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : There are only 937 names we could find in the corresponding original stotra

Source : shrIshivarahasyam | dvAdashAMshaH | adhyAyaH 24| 1-123 ||

Latest update : May 9, 2020

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


May 8, 2023

*sanskritdocuments.org*

Shri Shiva Sahasranamavali from Shivarahasya Adhyaya 24 1000 Names

# श्रीशिवसहस्रनामावलिः शिवरहस्यान्तर्गतम् अध्याय २४

शिवरहस्ये चतुर्विंशोऽध्यायः ॥

ॐ श्रीगणेशाय नमः ।

ॐ ओङ्कारकण्ठनिलयाय नमः । ओङ्कारार्थप्रकाशकृते ।
ओङ्कारबीजसुप्रीताय । ओङ्कारस्वरमात्रकाय । ओङ्कारार्थाय ।
ओमितीड्याय । नानामन्त्रस्वरूपवते । नादरूपाय । नाशिताघाय ।
नामरूपगुणातिगाय । नागाजिनोत्तरासङ्गाय । नामप्रीताय । नताखिलाय ।
मायातीताय । माधवेयाय । मार्गमाणाय । महेश्वराय । मांसादनाय ।
मातृमेयमानादिगुणवर्जिताय । शिवाय नमः । २०

ॐ शिवतराय नमः । अशीताय । शीतांशुकृतभूषणाय ।
शिवेतरहराय । शम्भवे । शिशिरर्तुप्रवर्तकाय । वामदेवाय ।
वशिने । शान्ताय । वाद्यमोदाय । अवसानकृते । वामाय । चक्रप्रदाय ।
वाग्मिने । वाय्वाहाराय । अगदाय । वसवे । यामिनीशकलामौलये ।
यातायानप्रियाय । यमिने नमः । ४०

ॐ यमप्रमथनाय नमः । यष्ट्रे । यजमानाय । यतीश्वराय ।
सिन्धुनिषङ्गाय । सिंहेन्द्राय । सिनीवालीस्तुतिप्रियाय ।
सिन्धुसिंहासनासीनाय । सिन्धुराङ्गत्वगम्बराय । धनाधीशाय ।
अन्धसां नाथाय । धर्माधर्मविचारकाय । धौम्याय । धात्रे ।
धराधीशाय । धूर्जटये । धर्मकेतनाय । नमिताशेषदिक्पालाय ।
नरनारायणार्चिताय । नतिप्रीताय नमः । ६०

ॐ नमस्कार्याय नमः । नगधृषे । नगवासभुवे । मयस्कराय ।
मन्त्ररूपाय । मस्करिणे । मस्तकाम्बुधृषे । मन्मथान्तकराय ।
मन्यवे । मनस्विने । मननातिगाय । कपालपाणये । कालात्मने । किष्कवे ।

कीर्तिप्रदायकाय । कुसुमार्चनसुप्रीताय । कुशलाय । केकयेश्वराय ।
कैलासमौलिनिलयाय । कोपात्मने नमः । ८०

ॐ कौलमार्गविदे नमः । कटाक्षपूज्याय । कस्तुरीगन्धवासैकमेदुराय ।
खण्डपर्शवे । खाण्डवासाय । खिल्याय । खीरप्रियाय । खुसाय
(खसाय) । खण्डपाय । खेटधृषे । खैराय । खान्तकृते ।
स्वर्धुनीश्वराय । खण्डितारातिनिलयाय । खर्जूरवनमध्यगाय ।
गयासुरहराय । गार्ग्याय । गिरीशाय । गीतिवर्धनाय । गुरवे नमः । १००

ॐ गुर्जरगाय नमः । गेयाय । गौरीभर्त्रे । गैरिकाय । गोवर्धनाय ।
गन्धवहाय । गन्त्रे । गर्वप्रणाशकृते । घण्टाध्वनिप्रियाय ।
घस्थाय । घनगर्भाय । घनाघनाय । चन्द्रचूडाय । चारुरूपाय ।
चित्रकर्मणे । चितिप्रियाय । चीनाजिनिने । चञ्चुचूडाय । चैत्रिणे ।
चैत्ररथाश्रिताय नमः । १२०

ॐ चेतसे नमः । अच्युताय । चण्डांशवे । चमसोद्भेदवासकृते ।
छत्रधृषे । छान्दसाय । छागवाहनाय । छद्मरूपधृषे ।
छेत्त्रे । छेदकराय । अच्छादाय । छन्दोगाय । छान्दसप्रियाय ।
जयदाय । जागताय । जिग्यवे । जयदाय । जीवितप्रदाय । जयकृते ।
जैत्रसञ्जेत्रे नमः । १४०

ॐ जिष्णवे नमः । जपपरायणाय । जकुटाद्रिकृतावासाय । जटिलाय ।
जम्बुकेश्वराय । जननाय । जूतिगाय । जूटिने । जङ्गमाजङ्गमात्मकाय ।
झञ्झावाद्यरताय । झङ्कारवप्रीताय । झर्झरिणे । झङ्कारकृते ।
झाङ्करिकाय । झषकेतननाशनाय । यमाय । यामप्रियाय । यन्त्रे ।
यजमानाय । यमिने नमः । १६०

ॐ यजुषे नमः । यशस्कराय । यत्नपराय । यष्ट्रे ।
यज्ञेश्वराय । यतये । टङ्काप्रियाय । टङ्ककराय । टक्काराय ।
टारवाहनाय । नीलकण्ठाय । कालकालाय । कमेराय । कश्मलापघ्ने ।
वैकुण्ठपूजापीठस्थाय । द्विठान्तमनुमध्यगाय । डाम्भिकाय ।
डमरुप्रीताय । डामरीतन्त्रपूरकाय । दाडिमीफलसुप्रीताय नमः । १८०

ॐ डम्भाय नमः । डम्भप्रियाय । जडाय । ढक्कारवप्रियाय ।
ढक्काधराय । ढक्कारिकाप्रियाय । ढुण्ढाय । गूढाय ।
महाबाढाय । गूढपादे । वरभूषणाय । णकारवाच्याय । गणपाय ।

फणाधरवरप्रियाय । वीणापाणये । शूलपाणये । कणपादे ।
कणभक्षणाय । तस्कराय । तीर्थकृते नमः । २००

ॐ तीर्थ्याय नमः । तुर्याय । तूर्यरवप्रियाय । तेजस्विने । तेजसां
नाथाय । तोषणाय । तौल्यलालिताय । तन्तवे । तमालनीलाङ्गाय ।
तारकाय । ताम्रतारणाय । धकाराय (थकाराय) । मन्मथारातये ।
प्रमथेशाय । कुथाऽऽवृताय । कम्पाकाय । कथाप्रीताय । कौथुमाय ।
गीतसुप्रियाय । दमनाय नमः । २२०

ॐ दान्तनिलयाय नमः । दिनेशाय । दानवानलाय । दुर्दान्ताय ।
दूतहरणाय । देशकालाय । दैवविदे । दोषघ्नाय । दुर्गतिघ्नाय ।
दण्डपाणये । दयापराय । धनदाय । धान्यदाय । धाराय ।
धुन्धुकौकाय । धुरन्धराय । धेनुप्रियाय । धैर्यधनाय ।
धर्माधर्मविशारदाय । नम्याय नमः । २४०

ॐ अनादये नमः । नीतिरताय । नृत्तज्ञाय । नेत्रपालकाय ।
नतार्तिशमनाय । नेत्रे । अनन्ताय । नामविवर्जिताय ।
पद्मनेत्रप्रपूज्याङ्घ्रये । पार्वतीशाय । प्रसादकृते । पीयूषकाय ।
पीतवाससे । पीनाङ्गाय । पालकाय । पवये । पोषणः । पैतृकाय ।
पोषाय । पन्नगाभरणाय नमः । २६०

ॐ पराय नमः । फणीश्वरधराय । भालनयनाय । फल्गुकेश्वराय ।
फूत्कारकृद्युतशिरसे । फणिताय । फणिताकृतये । बर्बराय ।
बाहुमते । बिन्दवे । बिल्मिनये । बुधवर्धनाय । जम्बूप्रीताय ।
अम्बरगताय । बैन्दवासनसंस्थिताय । बोधदाय । बौद्धहृद्ध्वन्धाय ।
बलप्रमथनिने । बलिने । भयहृते नमः । २८०

ॐ भानुदृषे नमः । भिल्लाय । भीतिदाय । भूतिभूषणाय ।
भेरीवाद्यप्रियाय । देवाय । भैरवाय । भोगभाजे । भवाय ।
भोज्यपूज्याय । भण्डखण्डाय । भीमाय । भागविवर्जिताय । मनोन्मनाय ।
माणवकाय । मितिकृते । मीनलोचनाय । मुनिप्रियाय । मूकपालाय ।
मेनकाजनकाय नमः । ३००

ॐ मनवे नमः । मैनाकवरदाय । मोचाफलप्रीताय । मरुत्वकाय ।
मौनिपूज्याय । मन्थरकाय । मस्करिणे । मयशिल्पदाय ।
यशोधनाय । यायजूकाय । यज्ञकृते । यज्ञनाशनाय । यात्रिकाय ।

यन्त्रमध्यस्थाय । यशोदातनयार्चिताय । रमणाय । रावणप्रीताय ।
रतिदाय । रुग्विनाशकृते । रेतस्विने नमः । ३२०

ॐ रैभ्यवरदाय नमः । रोदनाय । अरातिनाशनाय । रन्धनाय ।
रसपाय । रामाय । रतिदाय । रगणस्थिताय । ललाटनयनाय ।
लीनाय । लिङ्गस्थाय । लिङ्गमस्तकाय । लुलायवाहहरणाय । ललवे ।
लयविवर्जिताय । वसुदाय । वामदेवाय । विश्वनाथाय । विशालकृते ।
वीतिहोत्रमहानेत्राय नमः । ३४०

ॐ वेनाय नमः । वैश्वानराय । वटवे । वौषिङ्कृते । वामदेव्याय ।
वामभागाङ्गनाय । वशिने । षडध्वगाय । षडाधाराय ।
पाषण्डप्राणखण्डकाय । उच्चैर्घोषाय । घोरवेषाय । भीषणाय ।
बहुभाषणाय । शाङ्गाय । शान्ताय । शिवाय । शीताय । शुनकाय ।
शून्यकृते नमः । ३६०

ॐ शठाय नमः । शेषाय । विशेषणाय । शास्त्रे । शतात्मने ।
शौनकार्चिताय । सनातनाय । सावित्राय । सिन्धुजूटाय ।
सुनीथकाय । सूताय । सेतवे । सौतिकराय । सैकताय । सन्नतये ।
समाय । क्षपापतिकलाधारिणे । क्षात्रकर्मणे । क्षितीरभसे ।
क्षुद्रकर्मविनाशात्मने नमः । ३८०

ॐ क्षुत्तृष्णादिविवर्जिताय नमः । हाहाहूहूमुखस्तुत्याय ।
हानि (ह्रास) वृद्धिविवर्जिताय । हस्तिकृत्तिप्रियाय ।
हर्त्रे । हरिकेशाय । हराय । हनवे । हैयङ्गवीनहृदयाय ।
हरिदश्वान्तरस्थिताय । हंसकाख्यमहानागाय । हंसकूटाद्रिवासकृते ।
भुजङ्गभोगभूषाढ्याय । भूतिभूषितविग्रहाय । न्यङ्कुहस्ताय ।
शम्बरारिनिहन्त्रे । महेश्वराय । अर्णवान्तःस्थिताय । योगिने ।
भोगिने नमः । ४००

ॐ रागविवर्जिताय नमः । कपालधृषे । कालकालाय । कालातीताय ।
अक्षराय । पराय । पर्णशय्याय । महावैद्याय । आद्याय । अभेद्याय ।
विशारदाय । हिरण्यदशनाय । अहार्याय । मुञ्जिकेशाय । हरिद्युतये ।
हव्यवाहाम्बकाय । नित्याय । स्तुत्याय । वम्याप्रवर्तकाय ।
गयास्तुताय नमः । ४२०

ॐ गुणिने नमः । गोम्रे । निर्गुणाय । त्रिगुणातिगाय । विष्णुप्रीतिकराय ।

शोणाय । शोणाक्षय । शोणतीरगाय । शतावर्ताय । शाश्वतात्मने ।
शमनान्तकराय । शठाय । उगणाय । भगणाय । अधीशाय । प्रभवे ।
सम्मुखाय । ईश्वराय । सद्योजाताय । वामदेवाय नमः । ४४०

ॐ ईशानाय नमः । अघोरपूरुषाय । पञ्चब्रह्ममयाय ।
पञ्चमुखाय । पञ्चार्णमध्यगाय । पञ्चाक्षरीमध्यगताय ।
पञ्चकोशविवर्जिताय । पादपाय । पवनाय । पाशाय ।
पशुपाशविवर्जिताय । पथ्याय । पद्मजपूज्याङ्घ्रये । प्रघसाय ।
पङ्कजेक्षणाय । विश्वाय । विश्वाधिकाय । नेत्रे । विश्वाक्षाय ।
विश्वतोमुखाय नमः । ४६०

ॐ विष्णुपूज्याय नमः । विशां श्रेष्ठाय । विनायकवरप्रदः ।
गङ्गाधराय । अम्बिकाभर्त्रे । धर्त्रे । हर्त्रे । जनेश्वराय ।
मेघवाहाय । प्रसन्नात्मने । कङ्कालकवराय । मधवे ।
वीतिहोत्रमहानेत्राय । सत्रपात्राय । दिगम्बराय । महास्मशाननिलयाय ।
ईशानाय । गराशनाय । महाग्रासाय । महाभीमाय नमः । ४८०

ॐ विद्युत्याय नमः । शुक्लाय । ईश्वराय । कन्दर्पदर्पघ्ने । कान्ताय ।
कपर्दिने । नीललोहिताय । पिनाकपाणये । कालात्मने । गोपतये ।
वृषवाहनाय । सुरमन्दारमालाढ्याय । कन्धराय । अनन्तविक्रमाय ।
क्षयद्वीराय । मारहाराय । हराय । शीतांशुशेखराय ।
शताङ्गवरदाय । होत्रे नमः । ५००

ॐ यजमानाय नमः । यशस्कराय । मयस्कराय । शङ्कराय ।
शिपिविष्टाय । प्रतिष्ठिताय । प्रजापतये । पशुपतये । यतीनां
पतये । अग्निभुवे । सामगानप्रियाय । शुद्धाय । प्रशान्तात्मने ।
स्थिराय । प्रभवे । विभवे । विभासकाय । अनन्ताय । रुद्राय ।
उग्राय नमः । ५२०

ॐ महेश्वराय नमः । जागर्तकाय । जाङ्गलेशाय । जङ्गमाय ।
अजङ्गमात्मकाय । जातुकर्णप्रियाय । ज्येष्ठाय । कनिष्ठाय ।
श्रेष्ठाय । उत्तमाय । प्रतिष्ठायै । परमाय । धाम्ने । परमात्मने ।
ऋताय । महते । यन्त्रात्मने । मन्त्ररूपात्मने । मन्त्ररूपाय ।
सदाशिवाय नमः । ५४०

ॐ निगमागमसंसेव्याय नमः । सुराद्याय । प्रपितामहाय ।

सुरासुरगणाध्यक्षाय । त्र्यक्षाय । दक्षमखान्तकाय । महोक्षवाहाय ।
उक्षेड्याय । भगाक्षिहरणाय । अक्षताय । अनल्पकल्पाय । शिल्पादये ।
सुशीलाय । कौलपूजिताय । स्तव्याय । नव्याय । भव्यरूपाय ।
हव्यकव्यभुजे । अव्ययाय । महाबलाय नमः । ५६०

ॐ महोत्साहाय नमः । महादेवाय । महाङ्घ्रधृषे । शतावर्ताय ।
शान्तमनसे । सहमानाय । स्तुतिप्रियाय । सनातनाय । वामदेवाय ।
मनस्विने । मानवर्जिताय । गतिदाय । नतपाय । वाग्मिने ।
उच्चैर्घोषाय । महाहनवे । त्रिपुण्ड्रफालाय । भस्माङ्गाय ।
पुण्डरीकत्वगम्बराय । गायत्रीमध्यनिलयाय नमः । ५८०

ॐ मित्ररूपाय नमः । जगत्प्रभवे । प्रसेनजित्कक्षवासाय ।
नरसिंहनिपातनाय । कोलदंष्ट्राधराय । भूताय । भूतनाथाय ।
रतिप्लुताय । कूर्माम्रेडितपादाब्जाय । चन्द्रचूडाय । स्थिराय ।
मृडाय । गुढपादे । वरहाराध्याय । आढ्याय । मौढ्यविनाशकाय ।
दण्डिने । कुण्डिने । तण्डुपूज्याय । मुण्डिने नमः । ६००

ॐ पाषण्डवर्जिताय नमः । अलिङ्गाय । लिङ्गनिलयाय ।
स्फुलिङ्गसदृशेक्षणाय । बिल्वपूज्याय । बिल्मिनये ।
बिलेशयफणाधराय । बाणलिङ्गार्चनप्रीताय । वडवानलसम्भवाय ।
बलारातिभुजस्तम्भाय । भूपतये । विप्रपूजिताय । अन्धकान्तकराय ।
भर्गाय । गोवृषाङ्काय । उमाधवाय । धनञ्जयाक्षाय ।
कञ्चाक्षपूज्यपादाम्बुजद्वयाय । वीतरागाय । सान्द्रसुखाय नमः । ६२०

ॐ वङ्कशङ्कुशराय नमः । हराय । हयग्रीवार्चिताय । हेतिधराय ।
भिक्षाटनप्रियाय । युक्रे । युक्त्वाय । निर्णयाय । पाठकविद्वदधीनाय ।
त्रिमधवे । त्रिसुपर्णात्मने । पर्णशायिने । महेश्वराय ।
अञ्जनाक्षाय । खञ्जनात्मने । रञ्जनाय । रङ्गनृत्यकृते ।
वायवे । आयुःप्रदाय । मध्याय नमः । ६४०

ॐ गह्वरेष्ठाय नमः । अन्तकान्तकाय । शर्वाय । सर्वगताय । स्थाणवे ।
स्थविष्ठाय । सुप्रसन्नवाचे । शब्दाय । स्पर्शाय । रसाय ।
रूपाय । गन्धाय । चन्द्राय । विभावसवे । सर्वेन्द्रियगुणातीताय ।
सर्वेन्द्रियविवर्जिताय । सर्वेषां प्रभवे । ईशानाय । सर्वेषां
शरणाय । सुहृते नमः । ६६०

ॐ सीमाय नमः । भूमाय । महते आत्मने । प्रतिष्ठात्रे । पुरुषाय ।
पराय । पुच्छाय । ब्रह्मणे । ऋताय । सत्याय । हराय ।
वैष्णवपिङ्गलाय । ऊर्ध्वरेतसे । विरूपाक्षाय । क्षितीशाय ।
क्षान्तिवर्धनाय । सविशेषाय । निर्विशेषाय । शेषाहिकटकोज्ज्वलाय ।
रसाय नमः । ६८०

ॐ आनन्दाय नमः । आतार्याय । शष्पाय । फेन्याय । सिकत्यकाय ।
प्रवाह्याय । गेह्यवाह्याय । प्रसाद्याय । प्रमथाधिपाय । ज्ञानदाय ।
धनदाय । धीराय । दुन्दुभ्याय । भीतिनाशकृते । मयस्कराय ।
मस्करिणे । तस्कराय । भास्करेक्षणाय । यशस्कराय ।
कुलुञ्चेशाय नमः । ७००

ॐ भिषजामधिपाय नमः । यूने । वर्णिने । वन्याय । गृहस्थाय ।
सन्यासिने । न्यासमध्यगाय । भीमाय । सोमाय । प्रशान्तात्मने ।
धाम्ने । धूमसवर्णभृते । कामदाय । काममथनाय । क्रथनाय ।
कनकाम्बराय । समाय । निःसीममहिमाय । वनेशाय ।
क्षेत्रनायकाय नमः । ७२०

ॐ कैलासशैलनिलयाय नमः । विलयाय । लयवर्जिताय ।
रक्षाकराय । राक्षसघ्नाय । लास्यप्रीताय । रतिप्रदाय ।
प्रदोषताण्डवपराय । सर्वदोषहराय । हरये । आखण्डलमुखस्तुत्याय ।
मेरुकोदण्डधृग्वराय । वेदघोटाय । पाटिताशोह्यहिज्याय ?? ।
ब्रह्मसारथये । सूर्यचन्द्रमहाचक्राय । हरिबाणाय । अम्बरावृताय ।
क्ष्मारथाय । त्रिपुरारातये नमः । ७४०

ॐ कण्वपूज्याय नमः । विचारकाय । शूलिने । हलिने । लाङ्गलिने ।
मुसलिने । कुशलिने । बलिने । गदिने । शङ्खिने । वशिने । चक्रिणे ।
कवचिने । छन्दसां पतये । निषङ्गसागराय । शम्भवे । शान्ताय ।
सङ्गविवर्जिताय । धीरोदात्ताय । उदात्ताय नमः । ७६०

ॐ स्वरिताय नमः । प्रचयस्वराय । प्रणवाय । प्राणदाय । शोणाय ।
कणादाय । फणिकङ्कणाय । मौनिने । मानिने । जितारातये । रीति
धातुमयाय । महते । अणोरणीयसे । सुभगाय । महतोऽपि महत्तराय ।
स्वराजे । सम्राजे । विराजे । धात्रे । विधात्रे नमः । ७८०

ॐ सर्वतोमुखाय नमः । मेधाधिपाय । गाधिपूज्याय ।

आधिव्याधिविनाशनाय । गाधाधिपाय । व्याधिनीशाय ।
कलधौतप्रभाय । अबलाय । वेदगर्भाय । नीलकण्ठाय । कुण्ठिताघाय ।
कृपाकराय । जगदम्बापतये । साम्बाय । त्र्यम्बकाय । रविबिम्बगाय ।
सुधासागरमध्यस्थाय । मणिद्वीपनिकेतनाय । कदम्बवनमध्यस्थाय ।
नीपवापीप्रपान्तराय नमः । ८००

ॐ पापतापहराय नमः । गोघ्रे । शम्बरारिनिषूदनाय । त्रियम्बकाय ।
वरनटाय । जटाजूटविभूषिताय । काट्याय । नीप्याय । सूद्याय ।
सरस्याय । मेध्याय । वैद्युताय । ईध्रियाय । आतप्याय । आतार्याय ।
आलाद्याय । चन्द्रशेखराय । रेष्म्याय । रस्याय । वैशन्ताय नमः । ८२०

ॐ अनाद्याय नमः । कूप्याय । वटोद्भवाय । आहनन्याय । दुन्दुभ्याय ।
सिकत्याय । फेन्यवन्यकाय । प्रवाह्याय । सिकत्याय । प्रवाह्याय ।
गेह्याय । हिरण्यतल्पाय । आताम्राय । भवाय । रुद्राय । पितामहाय ।
संसारवैद्याय । विश्वात्मने । गजाय । चक्रप्रवर्तकाय नमः । ८४०

ॐ मेरवे नमः । पित्रे । स्विषवे पात्रे । गरिष्ठाय । गह्वराय ।
तरवे । हिरण्यबाहवे । आशास्याय । सेनानिने । गिरिशाय । मृडाय ।
सुधन्वने । बिल्वपत्रार्च्याय । गोनर्दाय । वृषाकपये । उरुगायाय ।
कल्पवृक्षाय । ज्योतिषे । हेतये । विभावसवे नमः । ८६०

ॐ सुतिथये नमः । कौशिकाय । धूर्ताय । धुत्तूरकुसुमप्रियाय ।
उमाधवाय । माधवार्च्याय । भस्मरुद्राक्षभूषिताय ।
गङ्गातुङ्गजटामौलये । नर्मदाशर्मदायकाय । तमालमालासुगलाय ।
करवाललसत्कराय । अट्टाट्टहासाय । विकटाय । दंष्ट्राकुटिलवक्त्रकाय ।
रक्तवृत्तेक्षणाय । सुभ्रुवे । श्वभ्राय । हर्त्रे । कवीश्वराय ।
फुल्लनीलोत्पलस्रग्विने नमः । ८८०

ॐ शम्याकार्च्याय नमः । विरोधघ्ने । आर्याय । सूर्यप्रभाय । शास्त्रे ।
सुहस्ताय । बस्तचर्मधृषे । क्षेत्रेशाय । जन्मघ्ने । आत्मने ।
अमोघाय । अद्रिजापतये । शाणचीरधराय । अघोराय । बर्बराय ।
भैरवाय । सख्ये । उष्णीषवसनाच्छन्न उपानत्पात्प्लवाय । शिवाय ।
वृक्षपल्लवसन्मौलये नमः । ९००

ॐ शुनाम्पतये नमः । अपां पतये । जघन्याय । बुध्न्याय ।
छन्दसे । अरुणाय । भगणेन्द्रधृषे । कुमारजनकाय । वेत्त्रे ।

परिवीतोपवीतधृषे । बभ्रवे । सुचेत्रे । मीढुषे । आषढाय ।
द्रापये । उत्तमाय । एकाक्षाय । नैकपादे । सुभ्रुवे । अधिपाय नमः । ९२०

ॐ मित्रपाय नमः । शिवाय । क्षेत्रपाय । स्वपतये । देवाय ।
धनपाय । शत्रुनाशकृते । अन्नेषवे । वातेषवे । तीर्थेषवे ।
प्रपथां पतये । आयुर्दाय । धनदाय । धीराय । रसाय । शिवतराय ।
भृगवे । ९३७

इति श्रीशिवरहस्ये द्वादशांशे स्कन्दकृत
शिवसहस्रनामस्तुतिर्नामावलिः समाप्ता ।

- ॥ श्रीशिवरहस्यम् । द्वादशांशः । अध्यायः २४। १-१२३ ॥

- .. shrIshivarahasyam . dvAdashAMshaH . adhyAyaH 24. 1-123 ..

There are only 937 names we could find in the
corresponding original stotra.

Proofread by PSA Easwaran

*Shri Shiva Sahasranamavali from Shivarahasya Adhyaya 24 1000 Names*
pdf was typeset on May 8, 2023

Please send corrections to *sanskrit@cheerful.com*